# Shankara Stotram 1

# શઙ્કરસ્તોત્રમ્ ૧

## Document Information

Text title : Shankara Stotram 1

File name : shankarastotram1.itx

Category : shiva, vAsudevAnanda-sarasvatI

Location : doc_shiva

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 12, 2021

*sanskritdocuments.org*

# શઙ્કરસ્તોત્રમ્ ૧

નમસ્તુભ્યં ભગવતે શઙ્કરાય મહાત્મને ।
જગદુત્પત્તિવિનાશાનાં હેતવે મોક્ષહેતવે ॥ ૧॥

સર્વદેવાધિદેવાય પાર્વતીપતયે નમઃ ।
ઋષિયોગિમુનીન્દ્રાણાં ત્વમેવ પરમા ગતિઃ ॥ ૨॥

બ્રહ્માણ્ડગોલકે દેવ દયાલુનાં ત્વમગ્રણીઃ ।
અત એવોલ્બણં પીતં ત્વયા હાલાહલં વિષમ્ ॥ ૩॥

ગઙ્ગાધર મહાદેવ ચન્દ્રાલઙ્કૃતમસ્તક ।
પરમેશ્વર માં પાહિ ભયં વારય વારય ॥ ૪॥

સર્વપાપં પ્રશમય સર્વતાપં નિવારય ।
દુઃખં હર હરાશેષં મૃત્યું વિદ્રાવય દ્રુતમ્ ॥ ૫॥

સ્તુતિં કર્તું ન મે શક્તિસ્તવ વાગ્ગત્યગોચર ।
દેહિ સત્સઙ્ગતિં ભક્તિં નિશ્ચલાં ત્વયિ શઙ્કર ॥ ૬॥

સર્વારિષ્ટં પરિહર સર્વશત્રૂન્વિનાશય ।
દારિદ્ર્યં હર સર્વેશ સર્વાન્કામાન્ પ્રપૂરય ॥ ૭॥

મુખે નામ દૃશો રૂપં હૃદયે ત્વત્પદામ્બુજમ્ ।
મમાસ્તુ તે નમઃ સામ્બ પ્રસન્નો ભવ સર્વદા ॥ ૮॥

ત્વદર્ચનવિધિં જાને ન ભક્તિસ્ત્વયિ મે હૃદિ ।
અથાપ્યનુગ્રહાણેશ કેવલં દયયોદ્ધર ॥ ૯॥

ઇતિ શ્રીવાસુદેવાનન્દસરસ્વતીવિરચિતં શઙ્કરસ્તોત્રં સમ્પૂર્ણમ્ ।

*Shankara Stotram 1*

pdf was typeset on May 12, 2021

Please send corrections to *sanskrit@cheerful.com*